"धृत्वाङ्गे कवचं निबध्य शरधिं कृत्वा पुरो माधवं
कामः कैरवबान्धवोदयधिया धुन्वन् धनु- र्धावति ॥")

शरपुङ्खा, स्त्री पुं, (शरस्य पुङ्खेव आकृतिर्यस्याः ।) नीलीवृक्षाकृतिवृक्षविशेषः । शरफोंका इति हिन्दीभाषा । तत्पर्य्यायः । काण्डपुङ्खा २ बाण- पुङ्खा ३ इषुपुङ्खिका ४ शायकपुङ्खा ५ इषुपुङ्खा ६ । तस्या गुणाः । कटुत्वम् । उष्णत्वम् । कृमि- वातरुजापहत्वम् । श्वेतायाः गुणाढ्यत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"शरपुङ्खो यकृत्प्लीहगुल्मव्रणविषापहः ।
तिक्तः कषायः कासास्रज्वरश्वासहरो लघुः ॥"
इति भावप्रकाशः ॥

बाणस्य पक्षे, पुं ॥ (क्ली, यन्त्रविशेषः । यथा, सुश्रुते । १ । ७ । "तेषां गरुडपदशरपुङ्खसर्प- फणावद्धिशमुखे द्वे द्वे एषण्यूहनचालनाह- रणार्थमुद्दिश्येते ॥")

शर(ल)भः, पुं, (शृणाति हिनस्तीति । शॄ हिंसा- याम् + "कॄशॄशलिकलिगर्द्दिभ्योऽभच् ।" उणा० ३ । १२२ । इति अभच् ।) मृगेन्द्रविशेषः । इत्यमरः ॥ तत्पर्य्यायः । महाङ्गः २ महा- स्कन्धी ३ महामनाः ४ अष्टपादः ५ महासिंहः ६ मनस्वी ७ पर्व्वताश्रयः ८ । इति राज- निर्घण्टः ॥ अस्य लक्षणं यथा,—
"अष्टपादूर्द्ध्वनयन ऊर्द्ध्वपादचतुष्टयः ।
तं सिंहं हन्तुमागच्छन्मुनेस्तस्य निवेशनम् ॥"
इति महाभारतम् । १२ । ११७ । १२ ॥

करभः । (यथा, ऋतुसंहारे । १ । २३ ।
"भ्रमति गवययूथः सर्व्वतस्तोयमिच्छन्
शरभकुलमजिह्मं प्रोद्धरत्यम्बु कूपात् ॥")
वानरविशेषः । इति मेदिनी ॥ उष्ट्रः । इति जटाधरः ॥ (विष्णुः । यथा, महाभारते । १३ । १४९ । ५२ ।
"अतुलः शरभो भीमः समयज्ञो हविर्हरिः ॥"
दनुपुत्त्रविशेषः । यथा, तत्रैव । १ । ६५ । २६ ।
"शरभः शलभश्चैव सूर्य्याचन्द्रमसौ तथा ।
एते ख्याता दनोर्वंशे दानवाः परिकीर्त्तिताः ॥"
नागविशेषः । यथा, तत्रैव । १ । ५७ । ११ ।
"विहङ्गः शरभो मेदः प्रमोदः संहता- पनः ॥")

शरभूः, पुं, (शरे शरवणे भूरुत्पत्तिर्यस्य ।) कार्त्तिकेयः । इति हेमचन्द्रः ॥

शरमयं, त्रि, (शरस्य विकारोऽवयवो वा । शर + "नित्यं वृद्धशरादिभ्यः ।" ४ । ३ । १४४ । इति मयट् ।) शरनिर्म्मितम् । यथा,—
"शरमयबर्हिषा कुशमयबर्हिर्व्वाधनत् ।" इति श्रुतिः ॥

शरमल्लः, पुं, (शरे शरवणे मल्ल इव ।) पक्षि- विशेषः । इति शब्दचन्द्रिका ॥ गोशालिक इति भाषा । (शरे बाणनिक्षेपादौ मल्लः ।) बाण- योद्धा च ॥

शरयुः, } स्त्री, नदीविशेषः । इति द्विरूप-
शरयूः, } कोषः ॥ दन्त्यसादिरयं शब्दः । इति बहुसम्मतः ॥

शरलः, त्रि, विगीतः । स्वच्छहृदयः । वृक्षविशेषे, पुं । इति सारस्वताभिधानम् ॥ दन्त्यसादिरप्यय- मिति बहुसम्मतः ॥

शरलकं, क्ली, जलम् । इति शब्दचन्द्रिका ॥

शरवणोद्भवः, पुं, (शरवणे उद्भवो यस्य ।) कार्त्ति- केयः । इति केचित् ॥ (यथा, महाभारते । ३ । २३१ । ८ ।
"ब्रह्मचारी ब्रह्मचारी च शूरः शरवणोद्भवः ॥")

शरवाणिः, पुं, शरमुखम् । पदातिः । शरजीवी । इति हेमचन्द्रः ॥

शरव्यं, क्ली, (शरवे हिंसायै बाणक्षेपाय वा साधु । शरु + "उगवादिभ्यो यत् ।" ५।१।२ । इति यत् । यद्वा, शरान् व्ययति । व्ये + डः ।) लक्ष्यम् । इत्यमरः ॥ (यथा, माघे, ।७।२४।
"विदधाति जनतामनःशरव्य-
व्यधपटुमन्मथचापनादशङ्काम् ॥")

शराघातः, पुं, (शरस्याघातः ।) बाणाघातः । तत्पर्य्यायः । प्रचलाकः २ । इति जटाधरः ॥

शराटिः, स्त्री, (शरं जलं अटति प्राप्नोतीति । अट् + इन् ।) शरालिपक्षी । इति शब्दरत्ना- वली ॥

शराडिः, स्त्री, शरालिपक्षी । इति शब्दरत्ना- वली ॥

शरातिः, स्त्री, (शरं जलमततीति । अत + इन् ।) शरालिपक्षी । इत्यमरटीकायां रामा- श्रमः ॥

शराभ्यासः, पुं, (शराणामभ्यासः ।) बाणशिक्षा । तत्पर्य्यायः । उपासनम् २ । इत्यमरः ॥ विक- र्षणम् ३ खुरली ४ शस्त्राभ्यासः ५ । इति शब्दरत्नावली ॥

शरारिः, पुं, (शरं जलं ऋच्छतीति । ऋगतौ + "अच इः ।" इति इः ।) शरालिपक्षी । तत्प- र्य्यायः । आटिः २ आडिः ३ । इत्यमरः ॥ आडी ४ शराडी ५ आडिका ६ शराली ७ शरालिः ८ शराटिः ९ शरालिका १० । इति शब्दरत्नावली ॥ (यथा, ऋतुसंहारे । ४ । ९ ।
"प्रफुल्लनीलोत्पलशोभितानि
शरारिकादम्बविघट्टितानि ।
प्रसन्नतोयानि सशैवलानि
सरांसि चेतांसि हरन्ति यूनाम् ॥")
अस्य गुणाः । पवनापहत्वम् । स्निग्धत्वम् । स्वष्टमलत्वम् । वृष्यत्वम् । वातरक्तहरत्वम् । हिमत्वञ्च । इति राजवल्लभः ॥ अपि च ।
"हंससारसकाचाक्षवककौञ्चशरारिकाः ।
नन्दीमुखीसकादम्बाः बलाकाद्याः प्लवाः स्मृताः ॥
प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः ।
वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः ॥"
इति भावप्रकाशः ॥

शरारुः, त्रि, (शृणातीति । शॄ + "शॄवन्द्यो- रारुः ।" ३।२।१७३ । इति आरुः ।) हिंस्रः । इत्यमरः ॥

शरारोपः, पुं, (शरस्यारोपो यस्मिन् ।) धनुः । इति जटाधरः ॥

शरालिः, स्त्री, शरारिपक्षी । इति शब्दरत्ना- वली ॥

शरालिका, स्त्री, शरारिपक्षी । इति शब्दरत्ना- वली ॥

शराली, स्त्री, शरारिपक्षी । इति शब्दरत्ना- वली ॥

शरावः, पुं क्ली, (शरं जलं अवति रक्षतीति । अव रक्षणे + अण् ।) मृत्पात्रविशेषः । शरा इति भाषा । तत्पर्य्यायः । वर्द्धमानकः २ । इत्यमरः ॥ मार्त्तिकः ३ सरावः ४ शाला- जिरम् ५ पार्थिवम् ६ मृत्कांस्यम् ७ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् । १२६ ।
"उदितेऽपि तुहिनगहने गगनप्रान्ते न दीप्यते तपनः ।
कठिनघृतपूरपूर्णे शरावशिरसि प्रदीप इव ॥")
कुडवद्वयपरिमाणम् । तत्तु चतुःषष्टितोल- कात्मकम् । सेर इति भाषा । तत्पर्य्यायः । मानिका २ । इति शब्दमाला वैद्यकपरि- भाषा च ॥

शरावती, स्त्री, (शराःतृणविशेषाः सन्त्यस्या- मिति । शर + मतुप् । "शरादीनाञ्च ।" ६ । ३ । १२० । इति दीर्घः ।) नदीविशेषः । इत्य- मरः ॥ (यथा, महाभारते । ६ । ९ । २० ।
"शरावतीं पयोष्णीञ्च वेणां भीमरथीमपि ॥"
लवस्य राजधानी । यथा, रघुः । १५ । ९७ ।
"स निवेश्य कुशावत्यां रिपुनागाङ्कुशं कुशम् ।
शरावत्यां सतां सूक्तैः जनिताश्रुलवं लवम् ॥")

शरावार्द्धं, क्ली, (शरावस्य अर्द्धम् ।) कुडवपरि- माणम् । तत्तु द्वात्रिंशत्तोलकात्मकम् । आधसेर इति भाषा । इति वैद्यकपरिभाषा ॥

शराश्रयः, पुं, (शराणामाश्रयः ।) तूणः । इति हेमचन्द्रः ॥

शरासनं, क्ली, (शरा अस्यन्ते क्षिप्यन्तेऽनेनेति । अस + करणे ल्युट् ।) धनुः । इत्यमरः ॥ (यथा, रघुः । ३ । ५२ ।
"स एवमुक्ता मघवन्तमुन्मुखः
करिष्यमाणः सशरं शरासनम् ॥"
पुं, धृतराष्ट्रपुत्त्राणामन्यतमः । यथा, महा- भारते । १ । ११७ । ४ ।
"चित्रोपचित्रौ चित्राक्षश्चारुचित्रः शरा- सनः ॥")

शरास्यं, क्ली (शरा अस्यन्तेऽनेनेति । अस् + ण्यत् ।) धनुः । यथा,—
"चिच्छेद तस्य तान् बाणान् शरास्यञ्च महा- मुने ।
युयुधातेऽतिसंरब्धौ परस्परवधैषिणौ ॥"